दिनाङ्क :- 01.09.2024 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

· राष्ट्रपतिः द्रौपदी-मुर्मु: अद्य नवदिल्ल्यां सर्वोच्च-न्यायालयस्य नूतन-ध्वजस्य प्रतीक-चिह्नस्य च अनावरणम् अकरोत्।

· रेलमन्त्री अश्विनी वैष्णव: कथितवान् यत् नवनिर्मितं वन्देभारत-शयन-यानस्य संस्करणं केषुचित् दिवसेषु उपलब्धं भविष्यति।

· समग्रदेशे अद्य आरभ्य राष्ट्रिय-पोषण-सप्ताह: समाचर्यते।

· ऋतु-विज्ञान-विभागेन असना इति चक्रवातस्य पश्चिम-दक्षिण-पश्चिम-दिशि समेधनेन शनैः शनैः शिथिलता अपि सम्भाव्यते। अपरत्र

तेलङ्गानाराज्यस्य विभिन्नेषु स्थलेषु अतिवृष्टिः भवति।

· अमरीका-ओपन-टेनिस-मिक्स्ड-डबल्स-इत्येतस्याः-स्पर्धायाः प्रागुपान्त्यचक्रे रोहनबोपन्ना इत्येषः अथ इंडोनेशियादेशस्य अल्दिलाज्-सुत्जियादी प्रविष्टवन्तौ।

।

## जनपद-न्यायालयसम्मेलनम्

राष्ट्रपतिः द्रौपदी-मुर्मु अद्य नवदिल्ल्यां सर्वोच्च-न्यायालयस्य नूतन-ध्वजस्य प्रतीक-चिह्नस्य च अनावरणम् अकरोत्। सममेव सा राष्ट्रिय-जनपद-न्यायपालिक-सम्मेलनस्य समापन-सत्रमपि सम्बोधितवती। अस्य द्वि-दिवसीय-सम्मेलनस्य आयोजनं सर्वोच्च-न्यायालयेन कृतम्। अस्मिन् जनपद-न्यायपालिकायां पञ्चसत्राणि आयोजितानि।

तेषु आधारिक-संरचना समग्र-न्यायालय-कक्षः न्यायिक-सुरक्षा प्रकरण- प्रबन्धनं प्रशिक्षणं च सम्मिलितानि आसन्।

गतदिने प्रधानमन्त्री नरेन्द्रमोदी सम्मेलनस्य उद्घाटनावसरे अवोचत् यत् महिलासु अत्याचारः बालानां सुरक्षा च समाजाय गभीर-चिन्तायाः विषयो विद्यते। तेनोक्तं यत् देशे महिलानां सुरक्षायै कठोरविधि-निर्मितास्ति परं तासां प्रभाविरूपेण क्रियान्वयनस्य आवश्यकता वर्तते।

<u>वन्देभारतम्</u>

रेलमन्त्री अश्विनीवैष्णव: अद्य बेंगलुरूनगरे नवनिर्मितस्य वन्देभारतरेलयानस्य शयनयान श्रेण्या: निरीक्षणं कृतवान्। असौ कथितवान् यत् वन्देभारतशयनयानस्य नवीनं संस्करणं परीक्षणाय

सज्जमस्ति। आगामिषु त्रिसु मासेषु यात्रिण: अनेन लाभेन लाभाविन्ता: भविष्यन्ति। श्रीवैष्णव: प्रोदीरितवान् यत् अस्मिन् वन्देभारतशयनयाने अनेकानि संशोधनानि जातानि। साम्प्रतं वन्देभारतमेट्रोरेलयानस्य अपि परीक्षणमपि प्रचलति। स्वदेशे निर्मित वन्देभारत-शयनयाने यात्रिभ्य: अनेकानि सौविध्यानि समेधितानि। अवधेयं वर्तते वन्देभारतरेलयानस्य एतस्यां शयनयानश्रेण्यां षोडश श्रेण्य: त्र्यशीत्यधिक अष्टशतम् आसनानि भविष्यन्ति इति।

<u>पोषणसप्ताह:</u>

समग्रदेशे अद्य आरभ्य राष्ट्रिय-पोषण-सप्ताह: समाचर्यते। अयं सप्ताह: प्रतिवर्षं सितम्बर मासस्य प्रथमदिनाङ्कत: सप्तमदिनाकं यावत् परिपाल्यते। अस्य वार्षिककार्यक्रमस्य प्रारम्भ: द्वयशीत्यधिक-नवदश-शततमेवर्षे महिला-बाल-विकास-मन्त्रालयस्य

खाद्य-पोषण मण्डलद्वारा विहित:। आसप्ताहं प्रचल्यमाणस्य अस्योत्सवस्य उद्देश्यं जनानां मध्ये पोषण-स्वास्थ्य-सम्बद्ध-जागरूकताया: संवर्धनमिति। अत्रावसरे नैका: सङ्गोष्ठ्य: कार्यशाला: शैक्षिककार्यक्रमा: सम्मेलनानि आयोज्यन्ते।

## उपराष्ट्रपति:- देहरादून यात्रा

उपराष्ट्रपति: जगदीपधनखड़: कोलकातानगरे एकया महिला-प्रशिक्षु-चिकित्सकया सह घटनां निन्दितवान्। असौ समाहूतवान् यत् एतादृशेषु अपराधेषु सम्मिलितानां दोषिणां दण्डनाय एकस्य तन्त्रस्य निर्माणम् आवश्यकमस्ति इति। अद्य उत्तराखण्डराज्ये ऋषिकेशस्य एम्स इत्याख्ये संस्थाने छात्रान् सङ्काय-सदस्यान् सम्बोधयन् श्रीधनखड़: प्रोक्तवान् यत् अक्षम्यापराधेभ्य: कठोराचारणं

विधीयते। असौ चिकित्सकानां परिचारिकानां स्वास्थ्यकर्मिणां च सुरक्षायै बलं प्रदत्तवान्। इत: पूर्वं स्वीय-द्वि-दिवसीययात्राया: द्वितीये दिने उपराष्ट्रपति: देहरादूनस्यस्य राष्ट्रिय-भारतीय-सैन्य-महाविद्यालयस्य प्रशिक्षून् सम्बोधितवान्। तदनु सैन्यविद्यालयेषु बालिकानां प्रवेशस्य निर्णयम् अभिनन्दितवान्। तेन भणितं यत् बालिकानां प्रवेश: लैङ्गिकसमानतां लैङ्गिकन्यायं च प्रदर्शयति यत् अस्मिन् दिशि सकारात्मक: पदक्रम: उत्थापित:।

## ऋतु-विज्ञान

ऋतु-विज्ञान-विभागेन देशस्य पश्चिम-मध्य-दक्षिण-भागेषु प्रचण्ड-वर्षायाः सङ्केतना प्रसारिता अस्ति। विभागेनोक्तं यत् विदर्भे तेलङ्गानायां च अद्य तीव्रवृष्टेः सम्भावना वर्तते। असम-तटीय-आंध्र-प्रदेश-यनम-केरल-माहे-तेलंगानायाम् अपि प्रचुर-वर्षायाः

संभावना अस्ति। ऋतु-विज्ञान-विभागेन असना इति चक्रवातस्य पश्चिम-दक्षिण-पश्चिम-दिशि समेधनेन शनैः शनैः शिथिलता अपि सम्भाव्यते। अयं चक्रवातः पश्चिम-बङ्गालस्य खात्याम् उत्तरपश्चिम-प्रति समेधितम्।

## <u>तेलङ्गानातिवृष्टि:</u>

तेलङ्गानाराज्यस्य विभिन्नेषु स्थलेषु अतिवृष्टि: भवति। अनया राज्ये जनजीवनं प्रभावितं जातम् तथा च विभिन्नानां जनपदानां निम्नक्षेत्रेषु जलसङ्ग्रहणमपि जातम्। राज्यप्रशासनेन एकादश जनपदानां प्रशासनेभ्य: रक्तवार्णिकी सञ्चेतना प्रख्यापिता। मुख्यमन्त्री रेवन्तरेड्डी आपात्सेवानाम् अधिकारिभ्य: चतुर्विंशतिहोरां यावत् उपलब्धतायै निर्देश: प्रदत्त:।

## <u>आन्ध्र-प्रदेश-आपत्-प्रबन्धन प्राधिकरण</u>

आन्ध्र-प्रदेश-आपत्-प्रबन्धन-प्राधिकरणेन असना इति चक्रवात-विषये सञ्चेतितम् यत् अयं चक्रवातः गतरात्रौ सार्ध-द्वादश-वादनात् सार्ध-द्विवादनं यावत् कलिङ्गपट्टन-तटम् उत्क्रान्तः। अस्य चक्रवातसस्य प्रभावेन उत्तर-आन्ध्र-प्रदेश दक्षिण-ओडिसा क्षेत्रे

प्रभाविते भविष्यतः। राज्यस्य नैकेषु भागेषु वृष्टिः संजायते। राज्यप्राधिकरणे सञ्चेतितं यत् कृष्णानद्याः जलस्तरं प्रथमस्तरात् उपरि विद्यते।

<u>एयर-मार्शल तेजिन्दर-सिंहः</u>

अद्य नवदिल्ल्यां भारतीय-वायु-सेनायाः उप-प्रमुखस्य पदभारं संभालितवान्। पदभार-ग्रहणानन्तरं तेन राष्ट्रिय-युद्ध-स्मारकम् उपेत्य सर्वोच्च-बलिदान-कर्तृभ्यः वीरेभ्यः पुष्पाञ्जलिः अर्पिता। एयर-मार्शल तेजिन्दर-सिंहः राष्ट्रियरक्षा अकादम्याः पूर्वछात्रः अस्ति। सप्तोत्तर-द्विसहस्रतमे वर्षे तस्मै वायु सेनापदकम् अथ द्वा-विंशत्युत्तर-द्विसहस्र-तमे अति-विशिष्ट-सेवा-पदकं च उपायनीकृतम्।

<u>जनतादलं-त्यागपत्रम्</u>

जनता-दल-यूनाइटेड इत्यस्य दलस्य वरिष्ठनेता के.सी. त्यागी अद्य दलप्रवक्तापदात् त्यागपत्रं प्रदत्तवान्। तस्य स्थाने राजीव-रञ्जन-प्रसाद: दलस्य नवीन: प्रवक्ता नियुक्त:। अत्रावधौ श्रीत्यागी अवोचत् यत् स: निराशायां नास्ति। साम्प्रतमपि स: दलेन सहास्ति। असौ अकथयत् यत् असौ जदयू इत्यस्य राजनीतिक-परामर्शद: अस्ति अपि च बिहारराज्यस्य मुख्यमन्त्रिणं नीतिशकुमारं प्रति तस्य राजनीतिक-प्रतिबद्धतास्ति। _

## पेरिस-पैरालम्पिक

पेरिस-नगरे प्रवर्तन-मानासु पैरालम्पिक-स्पर्धासु अद्य चतुर्थे दिने भारतीय-क्रीडका: नैकेभ्य: पदकेभ्य: योत्स्यन्ति। पुरुषाणां शॉटपुट-स्पर्धायां निर्णायके चक्रे रवि-रंगोली पुरुषाणां उन्नत-कूर्दन-स्पर्धायां निशादः

अथ च लक्ष्यवेध-स्पर्धायां अवनि-लेखरा दश मीटर-मिश्रित-लक्ष्यभेदक-स्पर्धायां क्रीडिष्यन्ति।

<u>बैडमिण्टन प्रतियोगितायाः</u>

बैडमिण्टन-प्रतियोगितायाः-पुरुषैकलद्वन्द्वे-भारतम् एकं स्वर्णपदकं, एकं रजतपदकम् अथ कांस्यपदकत्रयं समर्ज्य साम्प्रतं पदकतालिकायां द्वाविंशतितमे स्थाने अस्ति। तावत् अमरीका-ओपन-टेनिस मिक्स्ड डबल्स इत्येतस्याः स्पर्धायाः प्रागुपान्त्यचक्रे रोहनबोपन्ना इत्येषः अथ इंडोनेशियादेशस्य अल्दिला सुत्जियादी प्रविष्टवन्तौ। अत्र प्रागुपान्त्यचक्रीय- स्पर्धायां बोपन्ना अथ अल्दिला इत्येताभ्यां जॉन पेस-कैटरीना सेवा इति प्रतिद्वन्द्वि-द्वयं पराजितम्। तत्रैव स्पर्धायाः उपान्त्यचक्रे बोपन्ना-अल्दिला इत्येतयोः द्वन्द्वः मैथ्यू

एबडेन-बारबरा क्रेग इत्येताभ्यां समं समाचरितः। इत्थं बोपन्ना इत्येतस्य अथ मैथ्यू एब्डेन इत्येतस्य युगलं पुरुषडबल्स इति स्पर्धायाः तृतीयं चरणं प्राविशत्।